# टिळक महाराष्ट्र विद्यापीठ, पुणे

**19E**

## संस्कृत विशारद (बी. ए.)– बहि:स्थ

**परीक्षा : मे– २०२४**

**सत्र ५ वे**

**विषय: रत्नावली (19E456)**

**दिनांक: २८/०५/२०२४** **गुण : ८०** **वेळ : दु. २.०० ते दु. ५.००**

सूचना: १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.

**प्र.१. केषामपि चतुर्णां स्वभाषया अनुवादः करणीयः ।** (२४)

१) औत्सुक्येन कृतत्वरा सहभुवा व्यावर्तमाना ह्रिया तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताऽऽभिमुख्यं पुनः ।
दृष्ट्वाऽग्रे वरमात्तसाध्वसरसा गौरी नवे सङ्गमे संरोहत्पुलका हरेण हसता श्लिष्टा शिवायास्तु वः ।

२) समारूढा प्रीतिः प्रणयबहुमानदनुदिनं व्यलीकं वीक्ष्येदं कृतमकृतपूर्वं खलु मया ।
प्रिया मुञ्चत्यद्य स्फुटमसहना जीवितमसौ प्रकृष्टस्य प्रेम्णः स्खलितमविषह्यं हि भवति ।।

३) किं पद्मस्य रुचिं न हन्ति नयनानन्दं विधत्ते न किं वृध्दिं वा झषकेतनस्य कुरुते नाऽलोकमात्रेण किम् ।
वक्त्रेन्दौ तव सत्ययं पदपरः शीतांशुरुज्जृम्भते दर्पः स्यादमृतेन चेदिह तवाप्यस्त्येव बिम्बाधरे ।।

४) अस्त्रव्यस्तशिरस्त्रशस्त्रकषणैः कृत्तोत्तमाङ्गे क्षणं व्यूढासृक्सरिति स्वप्नत्प्रहरणे वर्मोद्गमद्वह्निनि ।
आहूयाऽजिमुखे स कोसलपतिर्भग्ने प्रधाने बले एकेनैव रुमण्वता शरशतैर्मत्तद्विपस्थो हतः ।।

५) श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी लोके हारि च वत्सराजचरितं नाट्ये च दक्षा वयम् ।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुनः मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः ।।

६) प्रसीदेति ब्रूयामिदमसति कोपे न घटते करिष्याम्येवं नो पुनरित् भवेदभ्युपगमः ।
न मे दोषोऽस्तीति त्वमिदमपि च ज्ञास्यसि मृषा किमेतस्मिन् वक्तुं क्षममति न वेद्मि प्रियतमे ।।

**प्र.२. ससन्दर्भं चतुर्णां स्पष्टीकरणं लिखत ।** (२४)

१) रत्नावलीव कान्ता मम हस्ताद् भ्रंशिता भवता ।
२) सखे इयमनभ्रा वृष्टिः ।
३) अथवा अनङ्गोऽसि ।
४) मुखरा खल्वेषा गर्भदासी ।
५) भवति, न मे ईदृशे प्रस्तावे एतद्वोढुं हस्तः प्रसरति ।
६) दुरवगाहा गतिर्दैवस्य ।

**प्र.३. टिप्पणीद्वयं लिखत ।** (१४)

१) यौगन्धरायणः
२) वृक्षदोहदम्
३) प्रस्तावना
४) नाटिका

**प्र.४. एकं सविस्तरं लिखत ।** (१४)

१) द्वितीयाङ्कस्य रसग्रहणं लिखत ।
२) श्रीहर्षं परिचाययतं नाटिकावैशिष्ट्यानि च सुस्पष्टयत ।
३) रत्नावल्यां नायकस्य तथा नायिकायाः महत्त्वं विशदयत ।

--------------